दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

himsanskritvartah
e-Sanskritnewspaper

नवा प्रेरणा नवोत्साहः

■ पृष्ठ-3 ■ वर्ष-3 ■ अङ्क-278

1

31.07.2024 बुधवासरः वि.सं. २०८० श्रावणकृष्ण एकदशी श्रावण 16 प्रविष्टांशः

Website- www.himsanskritam.com Email-himsanskrit@gmail.com

## ओलम्पिक इत्याख्ये क्रीडामहाकुम्भे मनु भाकरेण, सरबजोतसिंहेन च भुशुण्डिका-लक्ष्यवेधन-स्पर्धायां कांस्य-पदकम् अर्जितम्



हिमसंस्कृतवार्ताः, पेरिस

फ्रांसदेशस्य पेरिसनगरे अनुष्ठीयमाणे ओलम्पिक इत्याख्ये क्रीडामहाकुम्भे मनु भाकरेण, सरबजोतसिंहेन च मिश्रित 10 मीटर एयर पिस्टल शूटिंग इति भुशुण्डिका-लक्ष्यवेधन-स्पर्धायां दक्षिणकोरियादेशस्य ओह- ये- जिनस्य, ली- वोनहो इत्यस्य च युगलं दश- अङ्कान् विरुध्य षोडश- अङ्कैः पराभूय कांस्य-पदकम् अर्जितम्। अनेन विजयेन साकमेव मनुभाकरः क्रीडा- महाकुम्भस्य एकस्मिन्नेव संस्करणे पदक-द्वयस्य विजेत्री प्रथमा क्रीडिका सञ्जाता अस्ति।



अपरत्र च, सरबजोतेन नैजं प्रथमं पदकं विजितमस्ति। अतः पूर्वं मनुभाकरेण महिलानां 10 मीटर एयर पिस्टलस्पर्धायां कांस्यपदकं विजितमासीत् सहैव पी वी सिंधुः, मल्लयोद्धा सुशील-कुमारश्च द्वौ एतादृशौ भारतीयौ क्रीडकौ वर्तेते याभ्यां भूरि ओलम्पिकपदकानि पृथक्-पृथक्-क्रीडासु विजितानि सन्ति। अत्रान्तरे मनुभाकरस्य सरबजोतसिंहस्य च पदकार्जनम् अभिलक्ष्य राष्ट्रपतिः द्रौपदीमुर्मुः , प्रधानमन्त्री नरेन्द्रमोदी च मङ्गलवचोभिः तौ वर्धापितवन्तौ ।

### प्रधानमंत्री- मनु- सरबजोतसिंहौ

प्रधानमंत्रिणा नरेंद्रमोदिना पेरिस- ओलंपिके 10 मीटर एयर पिस्टल मिक्स्ड टीम स्पर्धा इति मिश्रित- भुशुण्डिका- लक्ष्य- भेदनस्पर्धायां कांस्यपदकस्य विजयम् अभिलक्ष्य मनु भाकरः, सरबजोतसिंहश्च भृशं वर्धापितौ। सामाजिकसञ्जालीये एकस्मिन् संदेशे प्रधानमंत्री व्यलिखत् यत् भारतीया लक्ष्यवेधकाः देशं गौरवान्वितं कुर्वन्तः सन्ति। अमुना प्रोक्तं यत् उभाभ्याम् अपि उत्कृष्ट-कौशलेन सामूहिक-कार्यं प्रदर्शितम्। प्रधानमंत्री प्रोक्तवान् यत् अनेन पदकार्जनेन भारतं नितान्तं प्रसन्नम् अस्ति।

## सुभाषितम्

**अप्रकटीकृतशक्तिः शक्तोऽपि**
**जनस्तिरस्क्रियां लभते।**
**निवसन्नन्तर्दारुणि**
**लङ्घ्यो वह्नि तु ज्वलितः॥**

**भावार्थः-** शक्तिशाली व्यक्ति जब तक अपनी शक्ति का प्रदर्शन नहीं करता,तब तक लोग उसका तिरस्कार करते हैं। जैसे लकड़ी से कोई नही डरता, परंतु जलती लकड़ी से लोग डरने लगते हैं।

*✍ प्रतीकसाठ्ये मुम्बई*

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## दिल्ल्यां जलमग्नता कारणेन मृतकस्य छात्रत्रयस्य प्रकरणे राष्ट्रिय-मानवाधिकार-आयोगस्य-अधिसूचना

**हिमसंस्कृतवार्ताः, युवराजभट्टराई।**

राष्ट्रिय- मानवाधिकार- आयोगेन दिल्ल्यां जलमग्नता कारणेन मृतकस्य छात्रत्रयस्य प्रकरणे दिल्ल्याः मुख्यसचिवाय, दिल्ल्यारक्षिबल- आयुक्ताय, दिल्ली-नगर-निगम-आयुक्ताय च अधिसूचना प्रख्यापिता अस्ति। आयोगेन इमे सर्वे सप्ताह-द्वयाभ्यन्तरे विस्तृत-प्रतिवेदन-प्रदानार्थं विनिर्दिष्टाः सन्ति। आयोगेन दिल्ल्याः मुख्यसचिवाय इदमपि प्रोक्तम् अस्ति यत् सः समस्त-दिल्ल्यां निर्धारित-मानदण्डानाम् उल्लङ्घनपूर्वकं सञ्चाल्यमानानां कोचिंग-सेन्टरइतिशिक्षणसंस्थानानां यथोचित-संख्यायाः ज्ञानार्थं गहनं सर्वेक्षणं कारयेत्। आयोगेन प्रोक्तं यत् एतादृशानां शिक्षण-संस्थानानां समग्रं विवरणं तानि विरुध्य प्रस्तुत-लम्बित-संस्तुतीनां, विभागद्वारा विहितकार्यचरणानां च विस्तृतं विवरणम् आयोगाय उपपादितं भवेत्।

## हावड़ा-मुंबई-रेलयान-दुर्घटनायाः अनन्तरं जनानां सुरक्षोद्धारकार्यं सम्पन्नम्

**हिमसंस्कृतवार्ताः, युवराजभट्टराई।**

झारखंड-राज्ये हावड़ा-मुंबई-रेलयान-दुर्घटनायाः अनन्तरं जनानां सुरक्षोद्धारकार्यं सम्पन्नम् अस्ति। ध्यातव्यम् अस्ति यत् चक्रधरपुर-रेल-मंडलस्य पोटोबेड़ा- ग्रामं निकषा बाराबाम्बो- खरसावा- रेल-स्थासनयोः मध्ये गतप्रातः हावड़ा- मुंबई-मेल- रेलयानस्य अष्टादश शायिकाः रेलपट्टिकातः अवतीर्णाः येन यात्रिद्वयं पञ्चतां प्राप्तं चतुर्विंशति- जनाश्च व्रणिताः अभवन्।

## लोकसभायाम् ऐषमः साधारण- वित्त- सङ्कल्पनापत्रके चर्चा समारब्धा

लोकसभायाम् ऐषमः साधारण- वित्त-सङ्कल्पनापत्रके चर्चा समारब्धा। चर्चायां भागं भजन् भाजपादलस्य दवेन्द्रसिंहः प्रोक्तवान् यत् वित्त-सङ्कल्पनेयं राष्ट्रं समावेशितापूर्णं विकासं प्रति नेष्यति। अमुना प्रोक्तं यत् प्रशासनं कृषकाणां कल्याणार्थं प्रतिबद्धम्। केन्द्रीय-वित्तसङ्कल्पनायां कृषिक्षेत्राय विशेषं ध्यानं दत्तम्। तत्रैव समाजवादीपार्टीति दलस्य अखिलेशयादवः उक्तवान् यत् वित्तसङ्कल्पनायां जीविकाहीनतायाः विषये, ग्राम्यक्षेत्राणां विकासविषये च ध्यानं नैव दत्तम् अस्ति। वार्ताप्राप्तिं यावत् चर्चा अग्रेऽपि प्रवर्तते स्म।

### प्रधानमंत्री-वित्तसङ्कल्पनासम्मेलनम्

प्रधानमंत्री नरेंद्रमोदी प्रावोचत् यत् देशस्य जीडीपी इति सकलगृहोत्पादाः प्रतिशतम् अष्टपरिमितेन विवर्धमानाः सन्ति अतः तद्दिनं नास्ति दूरं यदा भारतं वैश्विकस्तरे तृतीया बृहत्तमी अर्थव्यवस्था भविष्यति। नवदिल्ल्यां 'विकसित भारत की ओर यात्राः इति विकसितभारतं प्रति यात्रा ऐषमः केंद्रीय-वित्तसङ्कल्पना-पत्रक-सम्मेलनस्य बजट औद्घाटनिकसत्रं संबोधयता प्रधानमंत्रिणा प्रोदितं यत् महामार्यां सह युद्धानन्तरमपि भारतं नवीनशिखरसानौ सम्प्राप्तम् अस्ति। अमुना प्रोक्तं यत् प्रशासनं सर्वेषु क्षेत्रेषु ध्यानं केन्द्रीकरोति। प्रधानमंत्री उदैरयत् यत् सर्वकारः यादृश्या जवीयस्या गत्या आधारिक-संरचनानां निर्माणं करोति तदभूतपूर्वम् अस्ति। अमुना प्रोक्तं यत् पूंजीगतव्ययः संसाधनानां निवेशस्य सर्वोत्तमः बृहत्तमश्च उत्पादक-माध्यमः कथ्यते। सः न्यगादीत् यत् चतुरधिक-द्विसहस्रतमे वर्षे यूपीए- संयुतेः सर्वकारस्य प्रथमे वित्तसङ्कल्पनापत्रके पूंजीगतः व्ययः प्रायः नवति-सहस्रकोटिरूप्यकाणि आसीत् अथ च चतुर्दशोत्तर-द्विसहस्रतमे वर्षे एतत् सम्वर्ध्य द्वि-लक्ष-कोटिरुप्यकाणि जातानि सन्ति। अमुना प्रोक्यतं यत् सम्प्रति पूंजीगतः व्ययः एकादश-लक्ष-कोटितः अपि अधिकः अस्ति। प्रधानमंत्री प्रोदैरयत् यत् अधुना वित्तसङ्कल्पनायाः प्रारूपं विवर्ध्य त्रिगुणितं जातमस्ति यच्च अष्टचत्वारिंशत्-लक्ष-कोटिरूप्यकाणि जातमस्ति। अमुना प्रोक्तं यत् मन्त्रालयेभ्यः धनावण्टनम् अपि अभिलेख्यरूपेण समेधितमस्ति। तेन प्रोक्तं यत् भारतम् एकमात्रं तादृशं राष्ट्रमस्ति यत्र विकासपरिमितिः महार्घतापरिमितितः अल्पीयसी वर्तते। तेन एतदपि प्रोक्तं यत् विगतेषु दशवर्षेषु पञ्चविंशति-कोटिमिताः जनाः निर्धनतारेखातः बहिरगताः सन्ति। प्रधानमंत्री उक्तवान् यत् प्रशासनेन जनजीवनं सरलीकर्तुं, कौशलविकासेषु, आजीविकाक्षेत्रेषु च विशेषं ध्यानं दीयते। असौ उक्तवान् यत् वृत्तेः अवसराणाम् उत्पादकेषु सूक्ष्मलघुमध्यमउद्यमेषु अपि सविशेषं ध्यानं दीयते। अमुना प्रोक्तं यत् सर्वकारेण समेषां नागरिकाणां जीवनं सरलं विधातुं जीवनस्य गुणवत्ता सुनिश्चीयते। सः प्रोदितवान् यत् अद्य भारतस्य नीतिः, समर्पणं, दृढ़संकल्पः, निर्णयक्षमता च समस्तमपि विश्वं भारतदेशे निवेशार्थं आकर्षयति। असौ भणितवान् यत् भारतं विकासस्य स्थिरतायाः च प्रतीकभूतम् अस्ति। प्रधानमन्त्री प्रोक्तवान् यत् तस्य सर्वकारस्य समीहा प्रतिबद्धता च स्वच्छा वर्तते अथ च सर्वकारः विकसितभारताय पूर्णध्यानेन कार्यं कुरुते। एकदिवसीयस्य सम्मेलनस्य आयोजनं भारतीय- उद्योग- परिसंघद्वारा विहितम् आसीत् यस्योद्देश्यः विकासार्थं सर्वकारस्य व्यापक-दृष्टिकोणस्य उद्योगानां च भूमिकानां रूपरेखाप्रस्तवनम् अस्ति। उद्योगक्षेत्रस्य, शासनस्य, राजनयिक-समुदायस्य, विमर्शदलानां च पारेसहस्रं प्रतिभागिनः वैयक्तिकरूपेण अस्मिन् सम्मेलने भागं भजन्ते येषु नैके वैदशिकाः अपि समाविशन्ति।

## प्रधानमन्त्री कृषक-सम्माननिधियोजनायाः अन्तर्गतं ११ कोटिभ्यः अधिकेभ्यः कृषकेभ्यः ३.२४ लक्षकोटिरूप्य-काधिकं वितरणं कृतम्

**हिमसंस्कृतवार्ताः प्रवीण कुमारः**

कृषि-कृषक-कल्याणमन्त्री शिवराज-सिंहचौहानः ह्यः लोकसभायां लिखित-उत्तरेण उक्तवान् यत् प्रधानमन्त्री किसानसम्माननिधियोजनायाः अंतर्गतं सप्तदशसंख्याख्ये क्रमिक- अनुक्षेपं जूनमासे ९.२६ कोटिभ्यः अधिकेभ्यः कृषकपरिवारेभ्यः २० सहस्राधिककोटिरूप्यकाणां धनराशिः दत्ता। तेन एतदपि सूचितं यत् सम्पूर्ण ५१ सहस्राणि ८ शतं ४९ प्रशिक्षितासु कृषीसखीषु ३४ सहस्रं ९ शतं ७३ सखीभ्यः कृषिपरविस्तारकार्यकर्ता इति प्रमाणपत्रं प्रदत्तम् अस्ति।

## असमराज्ये लक्ष्मणप्रसाद-आचार्यः राज्यस्य नूतनराज्यपालत्वेन शपथवचनं स्वीकृतवान्

**हिमसंस्कृतवार्ताः, युवराजभट्टराई।**

असमराज्ये लक्ष्मणप्रसाद आचार्यः राज्यस्य नूतनराज्यपालत्वेन शपथवचनं स्वीकृतवान्। गौहाटी- उच्च-न्यायालयस्य मुख्य-न्यायाधीशेन न्यायमूर्तिना विजयविश्नोईवर्येण तस्मै नूतनराज्यपालत्वेन शपथवचनं कारितम्। अस्मिन् शपथसमारोहे मुख्यमन्त्री हिमन्तविश्वसरमा अन्ये च मन्त्रिणः अपि उपस्थिताः आसन्।

हिमसंस्कृतवार्ताः
दैनिकं ई-संस्कृतवार्तापत्रम्
हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः
2
31.07.2024 बुधवासरः विं.सं. २०८० श्रावणकृष्ण एकदशी श्रावण 16 प्रविष्टांशः
Website- www.himsanskritam.com Emai|-himsanskrit@gmai|.com

# २१ पदकूटसंख्यानां परीक्षापरिणामम् उद्घोषयिष्यति राज्य-चयन-आयोगः, राज्यसर्वकारेण स्वीकृतिः प्रदत्ता - मुख्यमंत्री सुखविन्दरसिंहसुक्खुः



**हिमसंस्कृतवार्ताः - शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः उक्तवान् यत् राज्यसर्वकारेण राज्यचयन- आयोगाय विभिन्नवर्गस्य २१ पदकसङ्ख्यानां परिणामान् घोषयितुम् अनुमोदनं दत्तम्। राज्यस्य युनां कृते योग्यतायाः आधारेण जीविकायाः अवसरान् प्रदातुं सर्वकारः प्रतिबद्धः अस्ति। सत्तां प्राप्तेः अनन्तरं राज्यस्य युनां कृते सर्वकारीयक्षेत्रे ३० सहस्राणि पदानि निर्मितानि, एतेषां पदानां पूरणस्य प्रक्रिया च आरब्धा अस्ति। सः अवदत् यत् पूर्वभाजपासर्वकारः केवलं जीविकायाः नामधेयेन युनां वञ्चनं कृतवान् तथा च पञ्चवर्षीयकार्यकाले केवलं २० सहस्राणि एव कार्याणि सर्वकारीयक्षेत्रे सृजिताना, येषु अधिकांशः वैधानिकसमस्यासु निरुद्धानि।

# मुख्यमन्त्रिणा कृतं ७५ तमस्य वनमहोत्सवस्य शुभारम्भः, अस्मिन् वर्षे ९ सहस्रहेक्टेयरभूमौ पौधरोपणस्य लक्ष्यम्



**हिमसंस्कृतवार्ताः - शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः ७५ तमस्य राज्यस्तरीय-वनमहोत्सवस्य उद्घाटनं कृत्वा स्वस्य आधिकारिकनिवासस्थाने ओक-ओवर इत्यत्र वटवृक्षस्य रोपणं कृतवान्। अस्मिन् वर्षे वनविभागेन राज्यस्य नवसहस्रहेक्टेयर भूमौ पौधरोपणस्य लक्ष्यं निर्धारितम् अस्ति। मुख्यमन्त्री शुष्कक्षतिग्रस्तवृक्षाणां निष्कासनार्थं मानकसञ्चालनप्रक्रियायाः अपि आरम्भं कृतवान्, यस्याः अन्तर्गतं वनरक्षकस्तरस्य द्वौ वृक्षौ, विभागीयवनपदाधिकारीस्तरस्य २५ वृक्षान् छेदयितुम् अनुमतिः प्रदत्ता। रेखीयपरियोजनानां त्वरिततायै मुख्यमन्त्री वनसंरक्षणस्य प्रथमचरणस्य अनुमोदनानन्तरं परियोजनायाः व्याप्तेः अन्तः पतितानां वृक्षाणां छेदनार्थं वनविकासनिगमस्य अधिकारिभ्यः अपि च वनविभागस्य अधिकारिभ्यः अधिकारं समर्पयितुम् अधिनियमं घोषितवान्। एतस्य अतिरिक्तं सः वनविभागस्य ई-वनसॉफ्टवेयरस्य बीटपरीक्षणमपि प्रारब्धवान्, यस्य उद्देश्यं विभागीयकार्यं सुव्यवस्थितं कर्तुं पारदर्शितायाः वर्धनं च अस्ति। सः वनक्षेत्रे फलवृक्षाणां रोपणं ३० प्रतिशतात् ६० प्रतिशतं यावत् वर्धयितुं बलं दत्तवान्, यत् आगामिषु दशवर्षेषु सकारात्मकं परिणामं प्राप्नुयात् इति अपेक्षा अस्ति। सः अवदत् यत् वनविभागेन निगमेन च गतवर्षे १५ सहस्रक्षतिग्रस्तवृक्षाः संसाधिताः, येन काष्ठविक्रयात् राजस्वं प्राप्तम्। फलतः केवलं सार्धैकवर्षे एव राज्यसर्वकारस्य स्वत्वशुल्क-आयः ३५ कोटिरूप्यकाणां स्थाने ७० कोटिरूप्यकाणां यावत् वर्धितः। सः अवदत् यत् राज्यसर्वकारेण रणनीतिकनिर्णयं कृत्वा वनविभागस्य निर्माणशाखायाः पिधानस्य निर्णयः कृतः, वनकार्येषु ध्यानं दातुं च निर्देशः दत्तः। मुख्यमंत्री सुक्खुः अवदत् यत् लाहौल-स्पीतौ महिलामण्डलानि पौधरोपणकार्यक्रमेषु वनसंरक्षणेषु च सक्रियरूपेण संलग्नाः सन्ति, येन महिलासमूहेभ्यः अपि राजस्वसृजनस्य अवसराः प्राप्यन्ते। मुख्यमन्त्री उक्तवान् यत् वर्तमानराज्यसर्वकारेण व्यवस्थापरिवर्तनस्य संकल्पस्य भागरूपेण विविधानि पदानि कृतानि। सः अवदत् यत् राज्यस्य वनविभागे अन्येषु च विभागेषु महत्त्वपूर्णाः परिवर्तनाः अभवन् येषां कारणात् कार्यशैल्याः उन्नयनस्य सङ्गमेन जनानां लाभः अपि प्राप्यते। सः अवदत् यत् २०२६ तमस्य वर्षस्य मार्चमासस्य ३१ दिनाङ्कपर्यन्तं राज्यं हरित- ऊर्जाराज्यं कर्तुं सर्वकारेण लक्ष्यं निर्धारितम् अस्ति तथा च एतत् लक्ष्यं प्राप्तुं वनविभागस्य अतीव महत्त्वपूर्णा भूमिका अस्ति। राज्यस्य हरित-उपक्रमान् प्रकाशयन् मुख्यमन्त्री उक्तवान् यत् राज्यसर्वकारेण ऊनामण्डलस्य पेखुबेलायां ३२ मेगावाट्-शक्तियुक्तं सौर- विद्युत्- संयन्त्रं स्थापितम्, आगामिषु षण्मासेषु द्वे अपि सौरसंयन्त्रे आरभ्यते। एतस्य अतिरिक्तं राज्यसर्वकारेण ऑयल इण्डिया कम्पनी इत्यनेन सह हरितहाइड्रोजनस्य उत्पादनार्थं सहमतिपत्रे हस्ताक्षरं कृतम् अस्ति, येन हिमाचलप्रदेशस्य हरित ऊर्जाराज्यत्वस्य लक्ष्यं प्राप्तुं मार्गः प्रशस्तः भविष्यति। कार्यक्रमे मुख्यमन्त्री राज्यस्य विभिन्नभागेभ्यः वनमहोत्सवे भागं गृह्णन्तः मन्त्रिभिः विधायकैः च सह आभासीय रूपेण संवादं कृतवान्।

# हिमाचले साइबरापराधः वर्धमानः अस्ति, प्रतिदिनं २५० उपालम्भाः प्राप्यन्ते




**हिमसंस्कृतवार्ताः - कार्यालयीयः प्रतिनिधिः।**
हिमाचलप्रदेशे साइबरापराधः वर्धमानः अस्ति। प्रतिदिनं द्विशतं पञ्चाशत्पर्यन्तं साइबर-अपराधस्य उपालम्भाः प्राप्यन्ते। साइबर-अपराधिनः शिमला- मण्डी- काङ्गड़ा-जनपदेषु जनान् लक्ष्यं कुर्वन्ति। नूतनविधैः जनाः वञ्चिताः भवन्ति। कदाचित् लॉटरी, उपहारपैक, विद्युत् बिलस्य अदत्तता, धनस्य द्विगुणीकरणम्, पेन्शनम् इत्यादीनि मिथ्याप्रतिज्ञाः दत्त्वा जनाः वञ्चिताः भवन्ति। साइबरपुलिसदलं जनान् जागरूकान् कर्तुं खण्डपञ्चायतस्तरयोः अभियानं प्रारब्धवान् अस्ति। विद्यालयानां महाविद्यालयानाञ्च युनां कृते अपि एतस्य विषये सूचनाः प्रदत्ताः सन्ति। साइबर-अपराधसम्बद्धानाम् उपालम्भानां पञ्जीकरणार्थं राज्ये एनसीआरपी-पटलम् आरब्धम्। अस्य पटलस्य हेल्पलाइनसङ्ख्या १९३० मध्ये १५ तः २० मिनिट यावत् उपालम्भस्य पञ्जीकरणं भविष्यति। एतेन सह वञ्चनप्रकरणानाम् अन्वेषणं समये एव आरभ्यते। डीआईजी- साइबरापराध मोहित चावला, एसएचओ साइबरापराधस्थानकम् शिमला डॉ. अमरसिंहः, प्रभारी अनिताकुमारी इत्येतैः च स्वसमूहेन सह एतत् पटलं प्रारब्धम्। हिमाचले एनसीआरपी- पटलस्य प्रवर्तनेन अधुना सामान्यजनानां कृते वञ्चनप्रकरणं दातुं सुकरं भविष्यति। पूर्वं यः उपालम्भः पुलिस-स्थानके एनसीआरपी-पटले पञ्जीकृतः आसीत्, सः प्रायः एकदिनं यावत् भवति स्म, परन्तु अधुना कतिपयेषु निमेषेषु एव उपालम्भस्य पञ्जीकरणं भविष्यति।

# डॉ. राजेन्द्रप्रसाद-शासकीय-चिकित्सा-महाविद्यालयः

## टाण्डाचिकित्सालयः कीर्तिमानं स्थाप्यिष्यति

डॉ. राजेन्द्रप्रसाद-शासकीय-चिकित्सा-महाविद्यालयः, टाण्डा राष्ट्रीय प्रत्यारोपणांग पुनर्प्राप्तिः केन्द्रपुरस्कारार्थं सम्पूर्णभारते सर्वश्रेष्ठपुरस्कारेण सम्मानितः भविष्यति। राष्ट्रीयाङ्ग-ऊतकप्रत्यारोपणसंगठनेन (NOTTO) १४ तमे भारतीय-अंगदानदिवसे भारतस्य स्वास्थ्य -परिवार-कल्याण-मंत्री, जे.पी नड्डा, परिवारकल्याणराज्यमन्त्री प्रतापरावगणपतरावजाधवः, अनुप्रिया इत्येतेषामुपस्थितौ ३ अगस्तदिनाङ्के नवदिल्लीनगरे पुरस्कारः प्रदीयते। सम्पूर्णे भारते सर्वोत्तमः तिष्ठन् डॉ. राजेन्द्रप्रसादः शासकीय-चिकित्सा-महाविद्यालयः टाण्डाचिकित्सालयः अन्यः अभिलेखः स्थाप्यिष्यति।

# प्रतिदिनं राष्ट्रध्वजारोहणेन छात्राणां मध्ये देशभक्तिभावना जागृता भविष्यतिः मुख्यमंत्री

**हिमसंस्कृतवार्ताः - शिमला ।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः अवदत् यत् राज्यसर्वकारः छात्राणां समग्रं समावेशी च विकासं सुनिश्चितं कर्तुं प्रतिबद्धः अस्ति। छात्राणां मध्ये राष्ट्रवादस्य देशभक्तेः च भावनां जागरयितुं राज्यसर्वकारेण राज्यस्य सर्वेषु विद्यालयेषु राष्ट्रगीतेन सह प्रातःकाले प्रार्थनासमागमस्य आयोजनं कर्तुं निर्णयः कृतः। एतदतिरिक्तं सर्वेषु उच्च- वरिष्ठ-माध्यमिक- विद्यालयेषु प्रतिदिनं राष्ट्रियध्वजोत्तोलनम् अनिवार्यं कर्तुं अपि निर्णयः कृतः। मुख्यमन्त्री उक्तवान् यत् एतादृशानि कार्याणि युनां सन्ततौ एकतायाः, देशभक्तेः च भावः जागृताः भविष्यन्ति। तेन सह छात्राः भविष्ये राष्ट्रस्य उत्तरदायी नागरिकाः भविष्यन्ति। सः अवदत् यत् वर्तमानराज्यसर्वकारेण प्रभारं स्वीकृत्य शिक्षाव्यवस्थायां विविधानि विकासात्मकानि पदानि स्वीकृतानि, एते निर्णयाः शिक्षाव्यवस्थायां सकारात्मकं परिणामं दर्शयन्ति। छात्राणां शारीरिकविकासः सुनिश्चित्य राज्यसर्वकारेण शारीरिकशिक्षां योगं च पाठ्यक्रमे अनिवार्यविषयान् कर्तुं निर्णयः कृतः। एतेन सह सर्वेषु विद्यालयेषु छात्राः प्रतिदिनं न्यूनातिन्यूनं १५ निमेषान् यावत् शारीरिकव्यायामं करिष्यन्ति। अस्मिन् काले शारीरिकशिक्षकाः अन्ये च शिक्षकाः छात्राणां व्यायामं प्राप्तुं सुनिश्चितं करिष्यन्ति। सः अवदत् यत् स्वास्थ्यस्य आयुषविभागस्य च सहकारेण छात्राणां कृते सीपीआर-प्राथमिकचिकित्सायाः प्रशिक्षणमपि दीयते, येन छात्राः जीवनरक्षककौशलस्य ज्ञानं प्राप्नुयुः। मुख्यमन्त्री उक्तवान् यत् एते विकासाः समग्रशिक्षाप्रदानार्थं राज्यसर्वकारस्य प्रतिबद्धतां प्रदर्शयन्ति। राज्यसर्वकारस्य एषः उपक्रमः शैक्षणिकज्ञानेन सह छात्राणां शारीरिक-मानसिकरूपेण सुदृढीकरणे सहायकं भविष्यति, तेषु आदर्शनागरिकाणां दायित्वं च प्रवर्तयिष्यति। एतानि कार्याणि छात्राणां दैनन्दिनकार्यक्रमे समावेश्य तेषु राष्ट्रवादस्य भावः जागृत्य एकीकृतभारतस्य निर्माणार्थं सज्जीकर्तुं सर्वकारस्य उद्देश्यम् अस्ति।



# केरलस्य वायनाड-जनपदे दुरापन्ने भूस्खलने नैके जनाः पञ्चतां प्राप्ताः





हिमसंस्कृतवार्ताः। केरलस्य वायनाड-जनपदे गतप्रभाते दुरापन्ने भूस्खलने नैके जनाः पञ्चतां प्राप्ताः आसन् येषु साम्प्रतं यावत् भूम्यन्तर-वर्तिनः त्रिणवति-मिताः शवाः भू-स्खलन-स्थलात् अधिगताः सन्ति । मृतकानां संख्या अतोऽपि वर्धिष्यते इति सम्भाव्यते । आधिकारिक स्रोतांसि सूचयन्ति यत् अस्यां दुर्घटनायां व्रणिताः अष्टाविंशत्युत्तर-एकशतं मिताः जनाः विभिन्नेषु चिकित्सालयेषु उपचाराधीनाः सन्ति । ध्वंसावशेषेषु निरुद्धानां जनानाम् उद्धाराय अधुना अपि आपद्- मोचनबलानि, राज्य-सर्वकारस्य विभागाः, जनता च पूर्णतो दृशा प्रयासपराः सन्ति । अत्रान्तरे केरल-सर्वकारेण दिनद्वयस्य शोकः घोषितः अस्ति। जन-धन-क्षतेः विषये गहनं शोकं प्रकाशयता सर्वकारेण घोषितम् अस्ति यत् अस्मिन् दिनद्वये सार्वजनिक-कार्यक्रमाः, समारोहाश्च स्थगिताः विधीयन्ते। अस्मिन्नवसरे राष्ट्रिय-ध्वजः अर्धावनतः स्थास्यति । दुर्घटनाम् इमाम् आलक्ष्य राष्ट्रपतिः द्रौपदीमुर्मुः, उपराष्ट्रपतिः जगदीप-धनखड़ः, प्रधानमन्त्री नरेन्द्रमोदी च गहनां शोक-सम्वेदनां प्रकाशितवन्तः । श्रीमोदिना मृतकानां परिवाराय प्रधानमन्त्रीकोश-तः द्वि-लक्ष-मितं अनुग्रह- राशि-प्रदानमपि घोषितम् अस्ति। सहैव व्रणितेभ्यः जनेभ्यः पञ्चाशत् रूप्यकाणां साहाय्यराशिः प्रदास्यते । प्रधानमन्त्रिणा केरलराज्यस्य मुख्यमन्त्रिणा पिन्नरई-विजयन् इत्यनेन सह सम्भाष्य सर्व-विध-साहाय्य-प्रदानम् आश्वासितम् अस्ति ।

## धारावाहिकं गीताप्रश्नोत्तरम्-७२

**अर्जुनः-** भगवन्! प्रकृतिपुरुषसम्बन्धं ज्ञानं सम्यक्तया त्वया उक्तम्, मयापि सामान्यतया अवगतम्। परन्तु प्रभो! अनेन ज्ञानेन कीदृशं फलं प्राप्यते?

**श्रीकृष्णः-** अर्जुन! गुणैः सह प्रकृतिं तथा गुणरहितं पुरुषं च यः यथावत् जानाति, सः शास्त्रोक्तानि कर्माणि कुर्वन्नपि तेषु न लिप्यते, एवं जन्ममरणबन्धनाद् विमुच्यते।

**अर्जुनः-** तस्य पुरुषसम्बन्धस्य ज्ञानस्य उपायान्तरम् अपि अस्ति किं भगवन्?

**श्रीकृष्णः-** कथं न? अस्त्येव अर्जुन! केचन ध्यानयोगेन, केचन सांख्ययोगेन, केचन च कर्मयोगेन आत्मना आत्मनि आत्मानम् अनुभवन्ति, प्राप्नुवन्ति च।

**अर्जुनः-** अस्तु, भगवन्! अन्यः इतोऽपि सरलोपायः अस्ति किम्?

**श्रीकृष्णः-** आम्, अस्ति अन्यः कश्चन सरलोपायः अर्जुन! ये मनुष्याः ध्यानयोगः, सांख्ययोगः इत्यादीनि साधनानि नावगच्छेयुः, ते केवलं जीवन्मुक्तानां महापुरुषाणाम् आदेशपालनार्थं तत्पराः भवेयुः। एतादृशाः आज्ञापालकाः श्रद्धालवः मनुष्याः अपि मृत्युं तरन्ति, अर्थात् जन्ममरणबन्धनात् विमुक्ताः भवन्ति।

**अर्जुनः-** कथं, केन प्रकारेण च ते मृत्युं तरन्ति भगवन्?

**श्रीकृष्णः-** हे पार्थ! अस्मिन् जगति यावन्तः स्थावर-जङ्गमाः प्राणिनः उत्पद्यन्ते, ते सर्वेऽपि क्षेत्र-क्षेत्रज्ञयोः सम्बन्धेन हि उत्पद्यन्ते इति विद्धि । यदा ते क्षेत्रेण सह न कमपि सम्बन्धं मन्यन्ते, तदा ते मृत्युं तरन्ति।

**अर्जुनः-** अस्य सम्बन्धस्य विमोचनार्थं मनुष्येण किं कर्तव्यं भगवन्?

**श्रीकृष्णः-** शृणु, अर्जुन! तदर्थं कर्तव्ये द्वे भवतः- एकत्र, स्वतःसिद्धेन परमात्मना सह आत्मनः नित्यसम्बन्धस्य अवबोधनम्, अपरत्र च प्रकृत्या अर्थात् शरीरेण सह स्थितस्य आत्मसम्बन्धस्य निर्मूलीकरणम्। विषमे संसारेऽस्मिन् यः समरूपेण स्थितः वर्तते, नश्यत्सु प्राणिवस्त्वादिषु यः अविनाशिरूपेण स्थितोऽस्ति, यश्च परमेश्वरः वर्तते इत्येवं प्रकारेण यः एतादृशं परमं स्वस्वरूपं पश्यति, सः एव यथावत् पश्यति, अर्थात् वास्तविकं स्वकीयं स्वरूपम् अनुभवति। सर्वत्र समरूपेण परिपूर्णेन परमात्मना सह एकत्वम् अनुभवेन, शरीरेण सह स्थितस्य तादात्म्यस्य अभावः भवति। ततः सः स्वयम् आत्मना स्वस्वरूपं न हिनस्ति, अर्थात् शरीरे मृते सत्यपि स्वकीयं मरणं न मन्यते। एतादृशः मनुष्यः परां गतिम्, अर्थात् परमात्मानं प्राप्नोति इति। (१३/२३-२८) (अनुवर्तिष्यते)-नारदोपाध्यायः।

असमप्रदेशीयः विज्ञानशिक्षकः नारदोपाध्यायः

# भारतीयज्ञानपरम्परा ज्ञानविज्ञानस्य समग्रजीवन-दर्शनस्य च संयोजनम् अस्ति- प्रो. अन्नपूर्णानौटियालः








हिमसंस्कृतवार्ताः-कुलदीपमैन्दोला। जगद्गुरूणाम् आदिशंकराचार्यजयन्त्याः शुभावसरे भारतीयदार्शनिकदिवसरूपेण समाचर्यते अस्यां श्रृङ्खलायां भारतीयदार्शनिक- संशोधनपरिषदः नवदेहली इत्यस्य सौजन्येन एच. एन. बी. गढ़वालविश्वविद्यालयस्य दर्शनशास्त्रविभागेन एकदिवसीयसंगोष्ठी आयोजिता। २९ जुलाई दिनाङ्के आयोजिता एषा संगोष्ठी भारतीयज्ञानपरम्पराविषये केन्द्रीभूता आसीत्। दर्शनशास्त्रविभागस्य प्रमुखा प्रो. इन्दुपाण्डेयखण्डुरी इत्यनेन सर्वेषाम् अतिथिनां स्वागतं कृत्वा भारतीयज्ञानपरम्परायाः महत्त्वं प्रकाशितम्। सः शङ्कराचार्यजयन्तीं भारतीयदार्शनिकदिवसरूपेण आयोजयितुं ऐतिहासिकपृष्ठभूमिम् अपि व्याख्यातवान्। तेन उक्तं यत् शृंगेरीमठस्य शंकराचार्यः भारतीयप्रधानमन्त्री भारतरत्नम् अटलबिहारी वाजपेयी इत्यस्य समये शङ्कराचार्यजयन्तीं भारतीयदार्शनिकदिवसरूपेण आयोजयितुं प्रस्तावम् अयच्छत्। फलतः भारतसर्वकारेण कतिपयवर्षपूर्वमेव एतत् उपक्रमः कृतः। प्रो. खण्डुरी भारतीयदार्शनिकदिवसरूपेण भारतीयसभ्यतायाः संस्कृतेः च सारं प्रस्तुतवान्। कार्यक्रमस्य मुख्यातिथिः गढ़वालविश्वविद्यालयस्य कुलपतिः प्रो. अन्नपूर्णा नौटियालः अवदत् यत् भारतीयज्ञानपरम्परा ज्ञानस्य, विज्ञानस्य, जीवनस्य समग्रदर्शनस्य च संयोजनम् अस्ति। नूतनशिक्षानीत्या पारम्परिकज्ञानं प्रति प्रत्यागमने अपि बलं दत्तम्। सः अवदत् यत् विकसितभारतस्य दृष्टिः स्थले आनेतुं आधुनिकविज्ञानस्य भारतीयज्ञानपरम्परायाः च सन्तुलनं आवश्यकम् अस्ति। सः अवदत् यत् छात्राः पुस्तकालयेषु मौलिकग्रन्थान् पठेयुः। पञ्जाबविश्वविद्यालयस्य चण्डीगढस्य दर्शनविभागस्य प्राध्यापिका वक्ता प्रो. शिवानीशर्मा, सौन्दर्यशास्त्रस्य सूक्ष्मतां व्याख्याय सत्यं, शिवं, सुन्दरं च अवधारणां, तस्य उपयोगितां, वर्तमानसान्दर्भिकतां च स्पष्टीकृतवती। डी. डी. यू. गोरखपुरविश्वविद्यालयः गोरखपुरस्य दर्शनविभागस्य अध्यक्षः प्रो. द्वारकानाथः योगदर्शनस्य ऐतिहासिकपृष्ठभूमेः च निष्कामकर्मसहितं योगस्य विविधपक्षेषु व्याख्यनं दत्तवान्। प्रो. पी. के. दासः, अध्यक्षः, दर्शनशास्त्रविभाग- नयागढ़कॉलेज- उत्कलविश्वविद्यालयः उड़ीसातः न्यायदर्शनस्य ज्ञानमीमांसीय चान्यपक्षं व्याख्यातवान्। प्रो. अरविंदविक्रमसिंहः न्यायदर्शनस्य ज्ञानविज्ञानादिपक्षं व्याख्यातवान्। प्रो. अरविंदविक्रमसिंहः, अध्यक्षः, दर्शनशास्त्रविभाग- राजस्थानविश्वविद्यालयतः भारतीयज्ञानपरंपरायाः अंतर्गतं सततविकासस्य अवधारणा चास्य उपादेयतां स्पष्टीकृतवान्। कार्यक्रमस्य अध्यक्षः प्रो. हिमांशु बौड़ाई, संकायाध्यक्षः, मानविकी च समाजविज्ञानसंकायः, गढ़वालविश्वविद्यालयतः कार्यक्रमाय आयोजकेभ्यः वर्धापनं दत्तवान् तथा भारतीयज्ञानपरंपरायाः विविधपक्षेषु स्ववार्तां स्थापितवान्। सः दर्शनस्य च मानवजीवने नीतिशास्त्रस्य महत्त्वं स्पष्टं कृतवान्। दर्शनविभागस्य सहायकप्राध्यापिका डॉ. ऋषिका वर्मा धन्यवादमतस्य प्रस्तावम् अकरोत्। कार्यक्रमस्य संचालनं दर्शनशास्त्रविभागस्य सहायकप्राध्यापिकया डॉ. कविताभट्टद्वारा कृतम्। मिश्रितसमन्वये आयोजितेऽस्मिन् कार्यक्रमे योगविभागाध्यक्षः डॉ. अनुजा रावतः, डॉ. विनोदनौटियालः, डॉ. रजनी नौटियालः, डॉ. चिन्ताहारनः, डॉ. घनश्यामः इत्यादिभिस्सह अनेकविभागानां शिक्षकाः, शोधकर्त्तारः एवं सुदीर्घछात्रसंख्यायां, डॉ. किरण आदयः प्रतिभागं कृतवन्तः। कार्यक्रमे रेखा डंगवालः, ओमप्रकाशः, पूनमरावतः, अनिलकठैतः योगदानं दत्तवन्तः।

## निबन्धः- भारतस्वतन्त्रता दिवसः



भारतस्वतन्त्रता दिवसः 'अगस्त'-मासस्य पञ्चदशे (१५/८) दिनाङ्के राष्ट्रियोत्सवत्वेन आभारते आचर्यते । १९४७ तमस्य वर्षस्य 'अगस्त'-मासस्य पञ्चदशे दिनाङ्के भारतगणराज्यं स्वतन्त्रम् अभवत् । अतः एतद्दिनं भारतस्वातन्त्र्यदिनोत्सवत्वेन आचर्यते । तत्पूर्वं ब्रिटिश-जनाः भारतस्योपरि शासनं कुर्वन्ति स्म । १९४७ तमस्य वर्षस्य 'अगस्त'-मासस्य चतुर्दशे (१४/८/१९४७) दिनाङ्के मध्यरात्रौ द्वादशवादने आङ्ग्लेयाः भारतगणराज्यस्य शासनं भारतीयेभ्यः यच्छन्तः भारतत्यागम् अकुर्वन् । भारतस्वतन्त्रतायाः तत् दिनं भारते राष्ट्रियपर्वत्वेन आचर्यते ।

भारतदेशे पूर्वं यवनाः विदेशात् आगत्य अत्र स्थित्वा प्रशासनम् अकुर्वन् । अनन्तरं पुर्तुगाल-देशीयाः, नेदरलैण्ड-देशीयाः, फ्रान्स-जनाः, ब्रिटिश-जनाः च आगताः । सर्वे अत्र शासनम् अकुर्वन् । तेषु प्रबलाः आङ्ग्लाः दीर्घकालपर्यन्तं प्रशासनाधिकारं प्रापन् । ततः स्वतन्त्रतां प्राप्तुं कर्णाटकराज्ये आङ्ग्लविरुद्धं युद्धं राज्ञी कित्तूरु चेन्नम्म आरभत । मङ्गल पाण्डेय, राज्ञी लक्ष्मीबाई, तात्या टोपे इत्यादयः युद्धं कृत्वा जनानपि प्राचोदयन् । देशे स्वाभिमानिनः राष्ट्रभक्ताः विभिन्नैः क्रान्तिमार्गैः आङ्ग्लविरुद्धं युद्धम् अकुर्वन् । सरदार वल्लभभाई पटेल, भगत सिंह, मदनलाला धिङ्ग्रा, चन्द्रशेखर आजाद, महात्मा गान्धी, मैलार महादेव, सङ्गोळ्ळि रायण्ण, नाना साहेब इत्यादयः आङ्ग्लविरुद्धं युद्धम् अकुर्वन् । लाला लाजपत राय, मातङ्गिनी हाजरा, भगत सिंह, चन्द्रशेखर आजाद सदृशाः वीरदेशभक्ताः स्वप्राणाहुतिम् अपि अयच्छन् । तेषाम् अन्तिमसमयेऽपि मनसि वचने च 'भारत माता की जय', 'वन्दे मातरं' जयघोषाः भवन्ति स्म । एवं भारतदेशं स्वतन्त्रं कर्तुं बहूनि स्वतन्त्रतान्दोलनानि अभवन् ।